A

# SAMAGRA SHIKSHA, KERALA

811

## Annual Evaluation - 2022-23

First Language Part I- Paper-I

## SANSKRIT

(For Academic and Sanskrit Schools)

**Class- VIII**

Time -1½ Hours

Total Score - 40

**निर्देशाः -**

- १५ निमेषाः समाश्वासकालः। प्रश्नान् पठितुम् उत्तराणि क्रमीकर्तुं च अयं कालः उपयोक्तव्यः।
- प्रश्नान् निर्देशान् च सम्यग् अवगम्य एव उत्तराणि लेखनीयानि।
- उत्तरलेखने मूल्याङ्काः कालः च परिगणनीयाः।
- विवर्तनप्रश्नाद् ऋते सर्वेषां प्रश्नानाम् उत्तरलेखने देवनागरीलिपिरुपयोक्तव्या।

**1. अधोदत्तेषु चतुर्णां प्रश्नानाम् उत्तराणि कोष्ठकात् निर्धार्य लिखत।** **4x1=4**

**क)** अधोदत्तेषु आसनेषु विश्रमासनं किम्?

(धनुरासनम्, शवासनम्, पद्मासनम्, वज्रासनम् )

**ख)** विपदि किं आवश्यकम्?

(धनम्, क्षमा, धैर्यम्, विद्या )

**ग)** मयूरसन्देशस्य कर्ता कः?

(त्यागराजस्वामी, ए.आर्.राजराजवर्मा, केरलवर्मा वलियकोयितम्पुरान्, स्वाति तिरुनाल्)

**घ)** दिलीपमहाराजस्य पत्नी का?

(पार्वती, सुदक्षिणा, नन्दिनी, सावित्री)

**ङ)** परस्परसहयोगेन कार्यसिद्धिः। अत्र कः न्यायः प्रवर्तते?

(कूपमण्डूकन्यायः, अरण्यरोदनन्यायः, स्थालीपुलाकन्यायः, अन्धपङ्गुन्यायः)

**2. यथोचितं योजयत।** **4x1=4**

| | | | |
|---|---|---|---|
| **क)** | वसिष्ठः | - | कृतचंक्रमणः। |
| **ख)** | निष्णातः | - | सूर्यवंशः । |
| **ग)** | भगवद्गीता | - | पण्डितः। |
| **घ)** | अरुक् | - | महाभारतम्। |

**3. उदाहरणानुसारं सन्धिच्छेदं लिखत।** **1x1=1**

**उदा-** विद्यैव - विद्या + एव

**क)** तथैव - ......... + ........

**4. उदाहरणानुसारं एकपदं लिखत।** **1x1=1**

**उदा-** लोकानाम् उक्तिः - लोकोक्तिः।

**क)** वेदानाम् उक्तिः - ..................................।

**5. अधोदत्तवाक्यात् सम्बोधनपदं चित्वा लिखत।** **1x1=1**

मातः! नालिकेरवृक्षमिव उन्नतिं प्रापय माम्।

**6-10 अधोदत्तेभ्यः प्रश्नेभ्यः चतुर्णाम् उत्तराणि लिखत ।** **4x2=8**

**6. उदाहरणानुसारं संख्यां लिखत।**

उदा - 1947 - सप्तचत्वारिंशदधिकनवशतोत्तरसहस्रम्।

1950 - ................................................।

**7. शाकानां फलानां च नामानि विविच्य पट्टिकां पूरयत।**

द्राक्षाफलम्, सूरणः, अनानसम्, पटोलः

| शाकः | फलम् |
|---|---|
| | |
| | |

**8. श्लोकं पठित्वा पट्टिकातः उचितमाशयं चित्वा लिखत।**

सर्वद्रव्येषु विद्यैव
द्रव्यमाहुरनुत्तमम्।
अहार्यत्वादनर्घ्यत्वा-
दक्षयत्वाच्च सर्वदा।।

**क)** सर्वमपि कार्यं सत्ये अधिष्ठितं भवति।
**ख)** विद्या सर्वश्रेष्ठं द्रव्यं भवति।
**ग)** दानं सर्वदुःखानि नाशयति।

**9. उदाहरणानुसारं वाक्यं परिवर्तयत ।**

**उदा -** भेकः स्थले वसति। सः जले च वसति।

भेकः **न केवलं** स्थले **किन्तु** जले च वसति।

**क)** आकाशे ग्रहाः सन्ति। आकाशे नक्षत्राणि च सन्ति।

**10. अधोदत्तं वाक्यं पठित्वा तुमुन्नन्त-ल्यबन्ताव्यये चित्वा लिखत।**

राजीवस्य सामर्थ्यं विलोक्य परिशीलकः तं क्रीडितुम् आहूतवान्।

**11. प्रादेशिकभाषया विवर्तयत।** **1x5=5**

पद्मश्रीपुरस्कारेण समादृतः कर्षकश्रेष्ठः भवति चेरुवयल् रामः। अयं महानुभावः केरलराज्यस्य वयनाट् जिल्लायाः मानन्तवाटी ग्रामे जन्म प्राप्तवान्। 'नेल्लच्छन' इति प्रसिद्धः अयं परम्परागतरीत्या बीजानां संरक्षणं करोति। प्रायशः एकपञ्चाशत्प्रकाराणि बीजानि अस्य संरक्षणे सन्ति। सः पूर्णतया जैवकृषिरीतिमाश्रित्यैव कृषिकर्म करोति।

**12-14 अधोदत्तेभ्यः प्रश्नेभ्यः द्वयोः उत्तरे लिखत।** **2x4=8**

**12. गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत।**

बुद्धधर्मप्रचारकः कविः आसीत् अश्वघोषः। अस्य जन्म उत्तरभारतस्य अयोध्यायाम् आसीत्। अयं बुद्धचरितं नाम महाकाव्यं व्यरचयत्। महाकाव्येऽस्मिन् अष्टाविंशत्यध्यायाः सन्ति। सौन्दरनन्दं, शारीपुत्रप्रकरणं च विरच्य अश्वघोषः संस्कृतसाहित्यमण्डलं पोषयामास।

**क)** अश्वघोषस्य जन्म कुत्र आसीत्?

**ख)** खण्डिकातः ल्यबन्तं पदं चित्वा लिखत।

**ग)** बुद्धचरिते कति अध्यायाः सन्ति?

**घ) महाकाव्येऽस्मिन्** इति पदस्य पदच्छेदं लिखत।

**13. कोष्ठकात् समुचितपदानि चित्वा सम्भाषणांशान् पूरयत।**

**(अपराधः, शोकाकुला, धन्यवादः, यानात्)**

माता - पुत्रि! त्वं ............ खलु। कारणं किम्?

अखिला - मातः! आगमनसमये अहं ............. अपतम्।

माता - मार्गनियमान् पालयित्वा एव यानचालनं करणीयं किल?

अखिला - मम ............. क्षम्यताम्। मातः! मम पादवेदना अस्ति।

माता - आगच्छ, औषधलेपनं करोमि। विश्रमं कुरु।

अखिला - अस्तु, .................।

**14. सूचनाः उपयुज्य रघुवंशमधिकृत्य लघुटिप्पणीं लिखत।**

**सूचनाः -** पञ्चमहाकाव्यानि - कालिदासः - रघुवंशम्- दिलीपः - सुदक्षिणा -अनपत्यतादुःखम् वसिष्ठः - नन्दिनीपरिचरणम्।

**15-17 अधोदत्तेभ्यः प्रश्नेभ्यः द्वयोः उत्तरे लिखत ।** **2x4=8**

**15. श्लोकं पठित्वा प्रश्नानाम् उत्तराणि लिखत।**

दानेन भूतानि वशीभवन्ति दानेन वैराण्यपि यान्ति नाशम्।
परोऽपि बन्धुत्वमुपैति दानैर्दानं हि सर्वव्यसनानि हन्ति।।


**क)** दानेन कानि नाशं यान्ति?

**ख)** किं सर्वव्यसनानि हन्ति?

**ग)** श्लोके **दुःखानि** इत्यर्थकं पदं किम्?

**घ)** केन भूतानि वशीभवन्ति?

**16. सूचनाः अनुसृत्य जीवनचरितं लिखत।**



नाम - पोन्कुन्नं वर्क्की

जन्म - 1 जुलाई 1910

पितरौ - वर्क्की जोसफ्, अन्नम्मा जोसफ्।

कर्ममण्डलम् - साहित्यकारः।

कृतयः - शब्दिक्कुन्न कलप्पा, अन्तित्तिरि, प्रेमविवाहम्

पुरस्काराः - वल्लत्तोल् पुरस्कारः, एषुत्तच्छन् पुरस्कारः, ललिताम्बिकासाहित्यपुरस्कारः।

मृत्युः - 2 जुलाई 2004

**17. उदाहरणानुसारं पट्टिकां पूरयत।**

| **लट्** | **लोट्** | **लङ्** |
|---|---|---|
| लिखति | लिखतु | अलिखत् |
| ............ | धावतु | .............. |
| गच्छति | .............. | .................. |

*** *** *** ***